શ્રીમદ્ બુદ્ધિકીર્તિસાગરસૂરી
જૈન જ્ઞાન મંદિર સાણંદ.
ક્રમાંક ૪૭૭

# अथ श्री सुभूमचक्रवर्त्ति कथा.

P.11102
15-04-1999

जो घायइ सत्ताइं । अलियं जंपेइ परधनं हरइ ॥
परदारं चिय वच्चइ । बहुपावपरिग्गहासत्तो ॥ १ ॥
चंडो माणी कुद्धो । मायावी निट्ठुरो खरो पावो ॥
पिसुणो संगहसीलो । साहूणं निंदओ अहमो ॥ २ ॥
आलप्पालपयंपी । सुदुट्ठबुद्धी य जो कयग्घो य ॥
बहुदुक्खसोगपउरो । मरिउं नरयंमि सो याइ ॥ ३ ॥

Serving JinShasan
079663
gyanmandir@kobatirth.org

व्याख्या—यो जीवः सत्वान् मारयति पुनरसत्यवचनं वदति, पुनरदत्तं वस्तु यो गृह्णाति, पुनः परदारेषुगम-

79663

॥ १ ।

नं करोति, पुनर्बहु परिग्रहं मेलयति, पुनर्यश्चंडो भयंकरो मानी अहंकारी क्रुद्धो मायावी निष्ठुरः खरः कठोरचित्तः पापी पिशुनोऽसंगशीलः कुसंगकृत्, साधूनां निंदकः, अधर्मी, असंबद्धवचनप्रजल्पकः, दुष्टबुद्धिः, च पुनर्यः कृतघ्नो भवति स बहुदुःखप्रचुरोऽत्यंतं दुःखी सन् मृत्वा नरकं याति, यथा अष्टमश्चक्रवर्त्ती सुभूमो महापापतः सप्तमं नरकं गतः. तस्य प्रबंधमाह—

वसंतपुरसमीपे एकं वनं वर्त्तते, तत्र वनाश्रमे जमदग्निस्तापसस्तपः करोति, स सर्वत्र जनपदेषु प्रसिद्धोऽभूत्. इतो देवलोके द्वौ मित्रदेवौ स्तः, एको वैश्वानरनामा देवो महाश्राद्धधर्मी जिनभक्तिवचनरक्तः, द्वितीयश्च धन्वन्तरिनामा देवो महाशैवधर्मी तापसर्षिभक्तश्च, द्वावपि तावात्मीयं धर्मं प्रशंसतः, एकेनोक्तं श्रीजैनसदृशः कोऽपि धर्मो नास्ति, द्वितीयेन चोक्तं शैवधर्मसदृशोऽन्यो धर्मो न, द्वावपि वादं कुर्वंतौ स्वस्वधर्मपरीक्षार्थं मनुष्यलोके समागतौ. अथ जैनधर्मिणा वैश्वानरदेवेनोक्तं जिनधर्ममध्ये जघन्यो नवदीक्षितो यः साधुस्तस्य परीक्षा कर्त्तव्या; शिवधर्ममध्ये च यः पुरातनस्तापसस्तस्य परीक्षा कर्त्तव्या, इतो मिथिलानगर्याः पद्मरथो राजा राज्यं त्यक्त्वा चंपानगर्यां श्रीवासुपूज्यस्य द्वादशमतीर्थंकरस्य पार्श्वे दीक्षां गृहीतवान्. तं पद्मरथं नवीनं साधुं दृष्ट्वा उभावपि देवौ तत्रागत्य तस्य परीक्षां कर्तुं प्रवृत्तौ. नानाप्रकाराणि पिष्टपक्वानि शीतलानि पानीयानि च तस्मै ताभ्यां दर्शितानि, उक्तं च भो साधो गृहाणेमानि ? तानि दृष्ट्वा क्षुधातृषापीडितोऽपि साधुरग्राह्याणि ज्ञात्वा न गृहीतवान्, एवं साध्वाचाररक्षणार्थमेका परीक्षा जाता. अथ द्वितीयां परीक्षां कुरुतः,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एकस्मिन् ग्राममार्गे ताभ्यां कंटकाः कर्कराश्च विकुर्विताः, द्वितीयमार्गे च मंडुक्यो विकुर्विताः स साधुर्महानुभावो जीवदयापाल
नार्थं तं मंडुकीसत्कं मार्गं त्यक्त्वा सकंटकमार्गे याति, तैः कण्टकैश्च तस्य महोपसर्गो जातः, पादाभ्यां रुधिरं स्थाने
स्थाने निस्सरति, तथापि स स्वधर्मान्न परिभ्रष्टः, अथ तौ तस्य तृतीयां परीक्षां कुरुतः, ताभ्यां दिव्यमायया मनोहर-
रूपलावण्योपेताः स्त्रियो विकुर्विताः, ताः स्त्रियस्तस्य साधोरग्रे नानाप्रकाराणि नृत्यादीनि हावभावान् भोगप्रार्थनादी-
नि च कुर्वन्ति, तथापि तस्य साधोर्मनो मनागपि स्वधर्मान्न चलितं पुनस्ताभ्यां नैमित्तिकरूपं विधाय तस्मै साधवे
प्रोक्तं भो साधो आवां ज्ञानिनौ नैमित्तिकौ स्वः, अधुनापि तवायुर्बहु वर्त्तते, अतो यौवनवयसि किमर्थं तपः करोषि ?
नानाश्रृंगाररसादियुतान् भोगान् भुंक्ष्व ? अधुनैवैवंविधं कांचनसदृशं शरीरं तपसा त्वया कथं शोष्यते ? एतन्न युक्तं,
वृद्धत्वे त्वया चारित्रं ग्राह्यं, तदा मुनिना प्रोक्तं यदि ममायुर्दीर्घमस्ति तदाहं बहुकालं चारित्रं पालयिष्यामि, धर्मं च क-
रिष्यामि, शरीरं च मे तेन निर्मलं भविष्यति, किं च यौवनवयो विना धर्मोऽपि न भवति, वृद्धत्वे किं स्यात् ? शरीरे
जर्जरीभूते सति किंचातप आदि किमपि न भवति, धन्यं मम भाग्यं, येन मे चारित्रोदयो जातः, एवं चतुर्भिः परीक्षा-
भिः परीक्षितोऽप्यसौ यदा न चलितस्तदा तौ देवौ हृष्टौ श्रीजिनशासनस्य प्रशंसां चक्रतुः, इति ताभ्यां जैनधर्मिमुनि-
परीक्षा कृता.

अथ शिवशासने वृद्धतापसपरीक्षार्थं तौ देवौ चलितौ, इतः पूर्वोक्तो जमदग्निनामा वृद्धस्तापसस्ताभ्यां दृष्टः, नग-

P.P. Ac. Gunratnasuri M.S.                                        Jun Gun Aaradhak Trust

श्लोकाः अपि तस्य पार्श्वे समागत्य तत्सेवां प्रत्यहं कुर्वंति, तस्य मस्तके महती जटा वर्तते, अथ तौ देवौ तस्य परीक्षार्थं
॥ २ चटकचटकीयुग्मरूपं विधाय तस्य कूर्चमध्ये आलयं कृत्वा स्थितौ, एकदा चटकेन मनुष्यभाषया चटिकांप्रति कथितं, हे
प्रिये ! अहं हिमवंतपर्वते गत्वा द्रुतमेवागमिष्यामि, तदा चटिकयोक्तं चेत्तत्रैव त्वं कयापि चटिकया सहासक्तः सन् वि-
लंबस्तदाहं किं कुर्वे? अतो भवता न तत्र गंतव्यं, तत् श्रुत्वा पुनश्चटकेनोक्तं चेदहं पश्चान्नागच्छामि तर्हि स्त्रीहत्यागोहत्यादि-
पातकं मेऽस्तु, तथैव कृतघ्नविश्वासघातकपरनिंदकानां या गतिर्भवेत् सा मे गतिरस्तु, चटिकयोक्तमेतत्किंचिदप्यहं न म-
न्ये, परं त्वं मयोक्तमेकं शपथं कुरु ? यथा मम प्रत्ययो भवेत्, चटकेनोक्तं कथय ? तयोक्तं चेत्त्वं पश्चान्न यासि तदास्य
महर्षेः पापं ते भवतु, इति शपथं कृत्वा त्वं याहि ? तत् श्रुत्वा जमदग्निः क्रुद्धः सन् स्वकूर्चमध्यात्तच्चटकचटिकायुग्ममा-
कृष्य करे च धृत्वोवाच अरे चटिके मया किं पापं कृतं ? वद वद ? चटिकयोक्तं हे ऋषे ? त्वमात्मनः शास्त्रं विचारय ?
उक्तं च—अपुत्रस्य गतिर्नास्ति । स्वर्गो नैव च नैव च ॥ तस्मात्पुत्रमुखं दृष्ट्वा पश्चाद्धर्मं समाचरेत ॥ १ ॥ तेन अपुत्र-
स्य गृहं शून्यमित्यादि. अतः कारणात् भो मुने त्वं क्रोधं संवर ? स्वगृहं च याहि ? ऋषिणापि तद्वचो मानितं. अथ
स जमदग्नितापसो गृहे गत्वा बहुपुत्रीपितुः कोष्टिकनगराधिपतेर्जितशत्रोर्नृपस्य पार्श्वे समागत्यैकां कन्यां ययाचे. एवं तं
तापसं चलचित्तं तपोभ्रष्टं विज्ञाय स मिथ्यात्वी देवो जैनधर्मे दृढानुरागी जातः, अथ तापसयाचनानंतरं राज्ञो- ॥ २ ॥
क्तं मम पुत्रीशतं वर्तते, तन्मध्याद्या त्वां वांछेत तां गृहाण? तदा स ऋषिर्नृपस्यांतःपुरे गतः तत्र सकलाः कन्यास्तं वा-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

पसं जटिलं दुर्बलं असंस्कृतदेहं मलिनांगोपांगं च दृष्ट्वा तंप्रति थूत्कृतं चक्रुः, तदा कुपितेनर्षिणा ताः सर्वा अपि कन्याः कुब्जीकृताः पश्चाद्वलितेन तेनैका नृपकन्या नृपप्रासादांगणे ...णा दृष्टा, तस्यै निजरूपं सम्यक् प्रदर्श्य तेनोक्तं त्वं मांवांछसि ? इत्युक्त्वा तस्या हस्ते बीजपुरकफलं दत्वा तामुत्पाट्य सचलितः शापभयभीतेन राज्ञा सहस्रगोकुलदासदासीसहिता सा कन्या तस्मै दत्ता, पश्चात्तेनर्षिणा नृपविनयतुष्टेन तपः प्रभावात्ताः सर्वा अपि कुब्जीभूताः कन्याः समीचीनाः कृताः, एवं तेन स्वकीयं सर्वमपि तपो निष्फलीकृतं, अथ तेन सा कन्या निजाश्रमे स्थापिता. यौवनं प्राप्ता च परिणीता, रेणुकेति तस्या अभिधानं जातं, तया सह स विषयसुखानि भुनक्ति. अथैकदा ऋतुकालसमये तस्यै जमदग्निनोक्तं हे प्रियेऽहं त्वांप्रत्येकं वस्तु साधयित्वा दास्यामि, येन तव पुत्रोत्पत्तिर्भविष्यति, तदा रेणुकयोक्तं हे स्वामिन् युष्माभिर्मंत्र द्वे वस्तुनी साधयितव्ये, यथैकेन वस्तुना क्षत्रियः पुत्रो द्वितीयेन च ब्राह्मणः पुत्रो मे भवेत्. तापसेनापि तथा कृतं, तद्वस्तुद्वयं च रेणुकाग्रे मुक्तं. अथ रेणुकया तन्मध्यादेकमौषधं जग्धं, तत्प्रभावतश्च तस्या महाशूरो महाप्रतापी च रामनामा पुत्रोऽभूत्. अपरं चौषधं हस्तिनागपुरे स्वभगिन्यै अनंगसेनायै प्रहितं, तया च तद्भक्षितं तत्प्रभावेण च तस्या अपि कृतवीर्यनामा पुत्रो जातः, इतः कश्चिदेको विद्याधरोऽतीसाररोगपीडितस्तस्मिन्नाश्रमे समागतः, रामेण तस्य परिचर्या कृता, ततो जातसमाधिना तेन विद्याधरेण रामाय परशुविद्या दत्ता, तेनापी सा साधिता, तत्प्रभावाच्च तस्याग्रे कोऽपि परश्वादिशस्त्रधारी स्थातुं न शक्नोति.

Jun Gun Aarathak Trust

अथैकदा सा रेणुका निजभगिन्या अनंगसेनाया मिलनार्थं हस्तिनागपुरेऽनंतवीर्यराज्ञो गृहे समागता, तां मनोज्ञरूपां दृष्ट्वाऽनंतवीर्यः कामविह्वलो जातः, क्रमेण परस्परप्रीत्युद्भावनतोऽनंतवीर्येण सा भुक्ता. ततश्च जातगर्भाया रेणुकाया-स्तत्रैवैकः पुत्रो जातः, अथान्यदा तत्पुत्रयुता रेणुका जमदग्निना स्वाश्रमे समानीता. एतदकार्यतो जातक्रोधेन रामेणानं-तवीर्यः परशुना हतः, तद् ज्ञात्वाऽनंतवीर्यपुत्रकीर्तिवीर्येण पितुर्वैरात्सदाश्रमे आगत्य जमदग्निर्हतः, तदा पराशुरामेण कीर्तिवीर्यं हत्वा हस्तिनागपुरस्य राज्यं गृहीतम्. इतः कीर्तिवीर्यस्य सगर्भा वनिता भयभीता ततो निर्गत्य वने तापसा-नामाश्रमे गता, तापसैरपि सा भूमिगृहे स्थापिता. तत्र तस्याश्चतुर्दशस्वप्नसूचितः सुभूमनामा पुत्रो जातः, अथ परशु-रामेण भ्रांत्वा परशुप्रभावेण क्षत्रियान् मारयित्वा सप्तवारान् निःक्षत्रिणी पृथ्वी कृता तेषां दंष्ट्राभिश्च स्थालः एको भृत्वा स्थापितः. अथैकदा परशुरामेण नैमित्तिकः पृष्टो यन्मम मरणं कस्य हस्ताद्भविष्यतीति, तदा नैमित्तिकेनोक्तं यस्य दृष्टा दंष्ट्राः क्षैरेयीरूपा भविष्यंती यश्च तां क्षैरेयीं भोक्ष्यते स पुरुषस्तव हंता भविष्यतीति. तदा परशुरामेण तं शत्रुं ज्ञा-तुमेका सत्रशाला स्थापिता. मुक्तश्च तत्र स क्षत्रियदंष्ट्राभृतः स्थालः सिंहासनोपरि. इतो वैताढ्यपर्वतवासीमेघनादनामवि-द्याधरेणैको नैमित्तिकः पृष्टो यन्मम पुत्र्याः को वरो भविष्यति ? नैमित्तिकेनोक्तं सुभूमनामा चक्री तव सुताया वरो भ-विष्यति तदा तेन विद्याधरेण सुभूमस्य शुद्धिं कृत्वा तेन सह निजपुत्री परिणायिता, तया सह सुखानि भुंजानः स तत्रैव भूमिगृहे तिष्ठति. अथैकदा प्राप्तयौवनेन तेन निजमाता पृष्टा हे मातः पृथ्वी किमेतावत्प्रमाणैव वर्त्तते ? तदा मात्रो-

॥ ३ ॥

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

क हे पुत्र ! आवां तु शत्रुभयतोऽस्मिन् तापसाश्रमे भूमिगृहमध्ये एव तिष्ठावः, परशुरामेण तव पितरं हत्वा हस्तिनापुर-
राज्यं गृहीतमस्ति, इत्यादिवृत्तांतं श्रुत्वा सुभूमः क्रुद्धः सन् भूमिगृहान्निःसृत्य निजश्वशुरं मेघनादं सार्थे गृहीत्वा हस्ति-
नागपुरे परशुरामकारितायां सत्रशालायां समागतः, तत्र च तस्य दृष्टिपातात्तद्दंष्ट्राभृतः स्थालः क्षैरेयीभृतः संजातः, सु-
भूमेन सा सर्वापि क्षैरेयी भक्षिता, तद् ज्ञात्वा परशुरामेण चिंतितं नूनं मम हंताऽयमेव, ततः परशुरामस्याज्ञया
तत्सेवकास्तं हंतुं समागताः, परं मेघनादविद्याधरेण ते सर्वेऽपि पराजिताः, तद् वृत्तांतं श्रुत्वा सक्रोधः परशुरामस्तत्र समा-
गतः, परं तत्र सुभूमं दृष्ट्वा स प्रतापरहितो जातः, इतः सुभूमेन तं स्थालमुत्पाट्य परशुरामं प्रति क्षिप्तः, तत्क्षणं चक्ररूपी-
भूतः स स्थालः परशुरामस्य मस्तकमलुनात्, एवं सुभूमश्चक्री जातः, ततो वैरं स्मृत्वा तेनैकविंशतिवारान्निर्ब्राह्मणी पृथ्वी
कृता, चक्रादिरत्नबलेन तेन षट्खंडानि साधितानि, तथापि तस्य लोभोदधिः परां वृद्धिं प्राप, ततोऽसौ धातकीखंडस्य-
भरतक्षेत्रसाधनार्थं लवणसमुद्रमध्ये सहस्रदेवाधिष्ठितचर्मरत्नोपर्यारूढः ससैन्यः प्रस्थितः, इतः समुद्रमध्ये मार्गे चर्माधिष्ठाय-
कानां मध्यादेकेन देवेन चिंतितमहं श्रांतोऽस्मि, अपरे च नवशतनवनवतिदेवा विद्यन्ते, ततोऽहं क्षणमेतच्चर्मरत्नं त्यक्त्वा
विश्रामं लभेयमिति विचिंत्य तेन तन्मुक्तं, भाविवशाच्छेषाणां सर्वेषामपि देवानां मनस्सु स एव विचारः प्रादुर्भूतः, ततस्ते
सर्वेऽपि चर्मरत्नं त्यक्त्वा दूरीभूताः, तेन ससैन्यः सुभूमः समुद्रमध्ये पतित्वा मृतः, लोभार्तध्यानवशाच्च सप्तमं नरकं गतः,

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

॥ ४ ॥

# अथ श्रीदामनककथा

गाथा—मारेइ जो न जीवे । दयावरो अभयदाणसंतुट्ठो ॥
दीहाऊ सो पुरिसो । गोयम भणिउं न संदेहो ॥ १ ॥

यो जीवान्न मारयति यश्च दयावान् भवति, पुनर्योऽभयदानं दत्वा संतुष्टो भवति स जीवो मृत्वा परभवे संपूर्णायुर्भवेत्. हे गोतम ! तद्विषये त्वं संदेहं मा कृथाः ॥ १ ॥ एवंविधः पुरुषो दामनकवद्दीर्घायुर्भवति, तद्यथा— ॥ ४ ॥

राजगृहनगरे जितशत्रुनामा राजा राजते, तस्य जयश्रीनाम्नी राज्ञी विद्यते, तत्र मणिकारः श्रेष्ठी तस्य च सुयशानाम्नी पत्नी, तयोः पुत्रो दामनकाख्योऽभूत्. स यदाष्टवार्षिको जातस्तदा तस्य पितरौ मृतौ, दारिद्र्यभावात्स दाम-

नको नगरमध्ये धनिनां गृहेषु भिक्षावृत्तिं करोति, अथैकदा द्वौ मुनी सागरपोताख्यवृद्धश्रेष्ठिनो गृहे आहारार्थं प्रविष्टौ. आहारं च गृहीत्वा यदा तौ बहिः समागतौ तदा ताभ्यां स भिक्षाचरो बालकस्तस्य द्वारि स्थितो दृष्टः, तं दृष्ट्वैकेन मुनिनोक्तं द्वितीयं मुनिंप्रति, भो मुने ? नूनमयं बालोऽस्य गृहस्य स्वामी भविष्यति. अथ गवाक्षस्थितेन गृहस्वामिना श्रेष्ठिना तत्सर्वमाकर्णितं, तेन च स वज्राहत इव संजातः, चिंतितं च तेन अहो मयाऽनेकैः कष्टैर्मायावीभूयाऽयं विभव-उपार्जितोऽस्ति तस्य विभवस्य चायं रंकः स्वामी भविष्यति, गुरुवचनमप्यन्यथा नैव भवेत्, अत एनं शिशुं केनाप्युपायेनाहं मारयामि तदा वरं. इति विचार्य स सागरपोतः श्रेष्ठी तं मुग्धं बालकं मोदकादिभिः प्रलोभ्य चांडालपाटके पिंगलाख्यचां-डालस्य गृहे मुक्तवान्. पश्चात्स स्वयमपि तस्य चांडालस्य गृहे गतः, तत्र गत्वा तेन तं चांडालं प्रत्युक्तमहं तुभ्यं मुद्रापं-चकं दास्ये. त्वमेनं शिशुं शीघ्रं हत्वा मां दर्शयेः, इत्युक्त्वा स निजगृहं गतः, अथ स मातंगस्तं बालकं सुरूपं वीक्ष्य करु-णापरोऽभूत्. ततोऽसौ चिंतयामास यदनेन शिशुनापि सागरपोतस्य कोऽपराधः कृतो भविष्यति? द्रव्यलोभतो मयापी-दृक्कर्म नोचितं कर्तुं, अतो मयाऽस्मै बालाय जीवितदानमेव देयं, इति विचार्य स चांडालः कर्त्रिकया तस्य शिशोः कनिष्ठां-गुलीं छित्वा तं प्रत्युवाच भो बाल अथ त्वमितो द्रुतं पलायस्व यदि जीवितं वांछसि, अन्यथा त्वामनया कर्त्रिकयाऽहं व्यापा दयिष्यामि. तत् श्रुत्वा वाताहतद्रुम इव कंपमानांगः स ततः पलाय्य यस्मिन् ग्रामे सागरपोतस्य गोकुलमभूत्तत्र गतः, तत्र नंदाभिधानेनाऽपुत्रकेन गोकुलस्वामिना स पुत्रतया स्थापितः, अथ स चांडालस्तस्य कनिष्ठांगुलीं गृहीत्वा साग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रपोतस्य पार्श्वे समागत्य तं तदभिज्ञानं दर्शितवान् तद्दृष्ट्वा सागरोऽपि स्वमनसि सहर्षो जातः. चिंतितवांश्च मया मुनेर्वाक्यं विफलीकृतं, एवं स सागरपोतः सुखेन तिष्ठति.

अथान्यदा स निजगोकुले गतः, तत्र नन्दगृहे छिन्नाङ्गुलिकं तं दामनकं यौवनस्थं दृष्ट्वा स विषण्णो जातः, नन्दं च पप्रच्छ, अयं तव पुत्रः कदा जातः ? कुतो वा त्वया समुपलब्धः ? सत्यं ब्रूहि ? तदा नन्देन कथितं अस्य बालकस्य कनिष्ठांगुली केनचित्कारणेन चांडालेन छेदिता, तद्भयात्पलाय्य सोऽत्र मदीये गृहे समागतोऽस्ति, मया च स पुत्रत्वेन रक्षितोऽस्ति. तत् श्रुत्वा सागरपोतेन विचारितं नूनं मुनेर्वचः सत्यं जातं. इति विचार्य चिंतातुरः श्रेष्ठी स्वपुरंप्रति चलितुं प्रवृत्तः, तदा नंदेन कथितं भो श्रेष्ठिन्नधुनैव भवतामत्रागमनं जातं, ततः शीघ्रं पश्चात्कथं प्रस्थानं क्रियते! किं किंचिद् गृहकार्यं त्वया विस्मृतमस्ति ? तदा श्रेष्ठिनोक्तं ममैकं महद् गृहकार्यं स्मृतिपथमागतं, ततोऽहं शीघ्रं गच्छामि. तदा नंदो जगाद, चेद्भवतां किंचिन्महत् शीघ्रं च करणीयं कार्यं भवेत्, तर्हि लेखं लिखित्वा ममास्य पुत्रस्य समर्पय ? स शीघ्रमेवेनो गत्वा तं लेखं भवत्पुत्राय तत्र समर्पयिष्यति. श्रेष्ठिनेऽपि तदुचितं, अतोऽसौ लेखमेकं लिखित्वा दामनकाय ददौ, सोऽपि तं लेखं गृहीत्वा द्रुतं राजगृहनगरसमीपे समागतः. अथ तस्मिन् लेखे तेन दुष्टेन पापिष्टेन श्रेष्ठिना स्वपुत्रंप्रतीति लिखितमासीत्, यदस्य लेखस्य समर्पयितारं प्रति त्वया निःशंकमनसा विषं देयं, तस्मिन् कार्ये ममाज्ञास्ति. अथ दामनकस्तं लेखं गृहीत्वा नगरसमीपे समागत्य विश्रामहेतोरुद्यानस्थस्मरदेवकुले स्थितः, मार्गश्रमतश्च तस्य तत्र

निद्रा समागता. इतस्तस्य सागरपोतश्रेष्ठिनो विषाभिधाना पुत्री वरार्थिनी स्मरदेवं पूजयितुं तत्र समागता, स्मरदेवं च प्रपूज्य यौवनावस्थाप्रादुर्भावतः सा देवंप्रति वरं ययाचे. इतस्तया तत्र निद्रितदामनकस्य पार्श्वे निजपितृमुद्रांकितो लेखो दृष्टः, इतस्तल्लाघवात्तया च स गृहीतः, तत्र लिखितं चोदंतं विज्ञाय तया चिंतितं, अहो मनोज्ञरूपो युवायं वर्त्तते, ममापि मानसमस्योपर्येव मोदते, अतोऽस्य युनो विषदानतो मारणमयोग्यमेव. इति विचार्य तया कज्जलशलाकया विषशब्दोपरिस्थं बिंदुं विलुप्य तस्य स्थाने विषा इत्यकरोत्. पुनस्तं लेखं मुद्रयित्वा दामनकस्य पटांचले सा बबंध. ततः स्वयं च निजगृहे समागता, इतो घटिकानंतरं दामनकः प्रबुद्धः शीघ्रं नगरमध्ये समागत्य तं लेखं श्रेष्ठिपुत्राय समुद्रदत्ताय दत्तवान्. समुद्रदत्तेन लेखं वाचयित्वा विचारितं, यत्पित्रा लिखितमस्ति अस्मै विषा प्रदीयतां, तस्मिन् विषये कोऽपि संदेहो न कार्यः, अतो मयापि तदाज्ञानुसारेणैव कर्त्तव्यं.

इति विचार्य तेन तयोः शीघ्रमेव विवाहोत्सवो विहितः. अथ विवाहदिनत्रयानंतरं सागरपोतकर्णपथे सा वार्त्ता गोकुलमध्ये एव जनमुखात् समागता, तेन सोऽतीव विषण्णः सन् ततो नगरंप्रति प्रस्थितः, मार्गे स मनसि चिंतयति, मया यत्किंचिच्चिंतीयते तत्सर्वं विधिस्त्वन्यथा करोति, नूनमयं मद्गृहजामाता जातः, तथाप्यहं पुनरेनं व्यापादयामीति चिंतयन् स दुष्टात्मा पिंगलनाम्नस्तस्य मातंगस्य गृहे समागत्य तं प्रत्युवाच, अरे ! चांडाल ! स त्वया कथं न मारितः? सत्यं वद ? चांडालेनोक्तं भो श्रेष्ठिन् तदा दयापरिणामवशतो मया स न व्यापादितः, अथ पुनस्तं बालं मम दर्शय, य-

था तं मारयित्वा तव मनोरथं सफलीकरोमि. अथ श्रेष्ठिनोक्तं भो पिंगल ! अद्याहं तं दामनकं संध्याकाले मम गोत्रदेव्या आयतने प्रेषयिष्ये, तदा त्वया तत्र स हंतव्यः, अथ संध्यासमये श्रेष्ठी गृहं समागत्य तौ वधूवरकौ प्रतीदमब्रवीत्, अरे युवाभ्यामद्यापि किं कुलदेव्याः पूजनं न कृतं ? यत्प्रसादादयं भवतोः संगमो जातोऽस्ति, इत्युक्त्वा पुष्पादिभृतभाजनयुतौ तौ दंपती संध्यासमये पूजार्थं गोत्रदेव्या आयतने स मुमोच. एवं तौ संध्याकाले पूजार्थं गोत्रदेवीमंदिरे गच्छंतौ दृष्ट्वा हट्टस्थितश्रेष्ठिपुत्रः समुद्रदत्त उत्थाय तौ प्रत्युक्तवान्, अत्र संध्यासमये पूजावसरो नास्ति, इत्युक्त्वा तावेकांते तत्र चतुष्पथे संस्थाप्य स्वयं च तत्पुष्पादि गृहीत्वा देवालये प्राविशत्. तदा संकेततस्तत्रागतेन पिंगलचांडालेन ज्ञातं यत्स एव पुरुषः समागतः, इति विचार्य तेन स श्रेष्ठिपुत्रः समुद्रदत्तः खड्गेन व्यापादितः, चिंतितं चाद्य मया श्रेष्ठिनो मनोवांछितं कार्यं विहितं. अथ क्रमेण तत्र हाहारवो जातः, सागरपोतो निजपुत्रमरणं विज्ञाय वक्षःस्फोटनेन पुत्रवियोगदुःखितो मृत्युमाप. अथ कुटुंबिभिर्मिलित्वा स दामनकस्तस्य श्रेष्ठिनो गृहादिसर्वधनस्यप्रभुश्चक्रे, अथ स दामनको यौवनेऽपि धर्मं चकार परं विषयेषु वांछां न व्यधात्, एकदा तेन कस्यचित्साधोरग्रे धर्मदेशना श्रुता, देशनाश्रवणानंतरं दामनकेन पृष्टं हे भगवन् कृपां विधाय यूयं मम पूर्वभवं कथयत ? मुनिनोक्तं भो दामनक श्रृणु !

अस्मिन्नेव भरतक्षेत्रे गजपुरनगरे सुनंदाख्य एकः कुलपुत्रोऽभूत्, तस्य जिनदासाख्यः सुहृद्बभूव एकदा तौ उद्याने गतौ, तत्रस्थं कंचनाचार्यं निरीक्ष्य सुनंदो मित्रसहितस्तदंतिके समागत्य स्थितः, आचार्येण देशना दत्ता, देश-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

79663

नामध्ये आचार्येण कथितं, यो मनुष्यो मांसं भक्षयति, स बहुदुःखभाग्नरकगामी च भवति, इति श्रुत्वा स जातसंवेगो
मांसभक्षणस्य शपथं जग्राह, जीवरक्षायां च तत्परोऽभूत्, तदादितः स कदापि जीवहिंसां नाऽकरोत्. अथ कियत्काला-
नंतरं तत्र कल्पांतकालोपमो दुष्कालः पतितः, सर्वे जनाश्च मांसभक्षणतत्परा जाताः, तदा सुनंदस्य भार्या तं प्रति कथ-
यति, हे स्वामिन् त्वमपि नद्यास्तीरे याहि ? तत्र च नदीमध्ये जालं विस्तार्य मत्स्यान् गृहीत्वानय ? येनास्मत्कुटुंबस्य
पोषणं भवेत्, इति तयोक्तोऽसाबुवाच हे प्रिये इदं कार्यं कदाप्यहं न करोमि, अस्मिन् कार्ये महाहिंसा भवति, तदा त-
द्भार्ययोक्तं त्वं कैश्चिन्मुग्धकैर्वंचितोऽसि, अतस्त्वं दूरे याहि ? एवं भार्यया बहुशो निर्भर्त्सितात्सुनंदो द्रहे मत्स्यान् निष्का-
सयितुं गतः. तत्रागाधे जले च जालं चिक्षेप, तत्र जालमध्ये पतितान् मीनान् दुःखाकुलान् वीक्ष्यानुकंपया स तान् मुत-
जलमध्येऽमुंचत्. दिनद्वयावधि तेनैवमेव कृतं, तृतीयदीनेऽप्येवं करणत एकस्य मीनस्य पक्षिका त्रुटिता, तद् दृष्ट्वा सु-
नंदोऽतीवशोकार्त्तो जातः, स्वगृहे समागत्य च स्वजनान् प्रति जगाद, अहं कदाचिदपि नरकनिबंधनरूपां जीवहिंसां
न करिष्यामि, एवमुक्त्वा स गृहान्निर्गतः, एवं कियत्कालं यावत्तन्नियमं प्रपाल्य ततो मृत्वाऽयं त्वं दामनको जातः, म-
त्स्यपक्षत्रोटनकर्मोदयत इह भवे तवैकांगुलिका त्रुटिता, एवं गुरुभ्यो निजपूर्वभवं श्रुत्वा सुनंदः संवेगतोऽनशनं विधाय
समाधिना च स्वायुः प्रपाल्य मृत्वा सुरो बभूव, ततश्च्युत्वा मर्त्यभवं प्राप्य जैनीं दीक्षां च प्रपद्य क्रमात्स मोक्षं यास्य-
ति ॥ इति जीवदयादानविषये दामनककथा संपूर्णा ॥

P. P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ॐ नमः सिद्धम् ॥

# अथ श्री वंकचूल कथा

अत्रैव भारते वर्षे विमलो नाम राजाऽभूत्, तस्य सुमङ्गला नाम्नी प्रिया. तयोश्चापत्यद्वयं जातम्, तत्रैकः पुष्पचूल-नामा पुत्रः. द्वितीया च पुष्पचूला नाम्नी कन्यका, यौवने च पित्रैका राजकन्या पुत्राय परिणायिता, पुत्री तु कस्मैचिद्राजपुत्राय दत्ता, परं दुष्कर्मोदयाद्बाल्ये एव पत्युर्मरणात्सा वैधव्यं प्राप्ता, सा भ्रातृस्नेहात् पितुर्गृहे एवास्थात्, अथ पुष्पचूलस्तु चौर्यादिव्यसनासक्तत्वेन पौरजनानत्यन्तं पीडयन् लोके वङ्कचूलाख्यां प्राप्तः, तद् भगिन्यपि तत्समान-बुद्धित्वेन वंकचूलेति प्रसिद्धाऽभवत्, ततो राज्ञा लोकतस्तस्योपालम्भं बहुतरमाकर्ण्य क्लिष्टेन सता स पुराद् बहिष्कृतः, तदा पत्नीभगिन्यावपि तत्स्नेहात् सार्थं निर्गते ततो वंकचूलः पत्नीभगिनीभ्यां सह निर्भयः सन् कानिचिदरण्यानि भ्रमन् धनुर्धरैर्भिल्लैर्दृष्टः; तत्र चाकस्मैव तं राजपुत्रं ज्ञात्वा सादरं प्रणम्य प्रश्नपूर्वकं तद्वृत्तान्तं तमाकर्ण्य बहुमानतः स्व- 

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पल्लीं समानीय मूलपल्लीपतेर्मृतत्वात् तत्स्थाने तं ते स्थापितवन्तः, ततो वंकचूलो भिल्लैः सार्धं महीतलं लुंठन् तत्र सुखेन तस्थौ ॥

अथैकदा वर्षाप्रादुर्भावसमये कियद्भिर्मुनिभिः परिवृताः, श्रीचन्द्रयशःसूरयः सार्थपरिभ्रष्टास्तत्र समेताः, तदा नव्योत्पन्नाङ्कुरसम्मर्दात् सचित्तजलसंघट्टाच्च भीरव आचार्या विहारायोग्यतां ज्ञात्वा तां पल्लीं प्रविष्टाः, वंकचूलोऽपि मुनीन् दृष्ट्वा कुलीनत्वात् प्रणमति स्म, तदा गुरवो धर्मलाभाशिषं दत्वा तं प्रति वसतिं ययाचिरे, तेनाप्युक्तम्. हे स्वामिन् ? तुभ्यं वसतिं दास्यामि, परं मम सीमायां कदापि धर्मो न वाच्यः, यतो येषां हिंसाऽसत्यचौर्यादीनां त्यागेन धर्मः सम्पद्यते, तैरेवास्माकमाजीविका विद्यते इति, एवं तेनोक्ते सति गुरुभिस्तद्वचोऽङ्गीकृत्य तद्दर्शितनिरवद्यस्थानके स्वाध्यायध्यानादिधर्मकृत्यं कुर्वद्भिश्चतुर्मासान् यावत्तस्थे, तत्र च तेनाहारादिनिमन्त्रणायां कृतायां गुरुभिरुक्तम्, भवदीयगृहभिक्षाऽस्माकं न कल्पते, वयं तपश्चर्ययैवेह स्थिताः सुखेन कालं गमयिष्यामः, भवतो हि उपाश्रयदानेनैव महापुण्यसम्बन्धो जातः,

उक्तंच—" जो देइ उवस्सं मुणि- वराण तवनियमजोगजुत्ताणं ।
तेणं दिन्नावत्थन्नपाणसयणासणं विगप्पा ॥ १ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पावइ सुरनररिद्धी सुकुलुप्पत्तीय भोगसामग्गी ।
नित्थरइ भवमगारी सिज्झइ ताणेण साहूणं ॥ २ ॥

ततो वर्षाकालेऽतिक्रान्ते गुरुभिस्तं वंकचूलमापृच्छ्य विहारे क्रियमाणे सोऽपि तेषां सत्यप्रतिज्ञतादिगुणैर्हृष्टः सन् भक्त्या तान् गुरूनन्वगात् तत्र कियत्यपि मार्गे गते सति स निरस्थितमुनिवियोगाविह्वलः सन् गुरून् नत्वा न्यजिज्ञपत् स्वामिन्नितः परं परेषां सीमा विद्यते, अतोऽहं वलिष्ये पुनर्मम भवद्दर्शनं सद्यो भवतात्, एवं तेनोक्ते सति गुरवो मधुराक्षरैस्तं प्रोचुः, हे सौम्य भवत्साहाय्याश्रयमियत्कालं सुखं स्थिताः, अथ यदि तुभ्यं रोचते तर्हि प्रत्युपकर्तुं किञ्चिद्वक्ष्महे, तेनोक्तं यादृशमया सुखेन पालयितुं शक्यते, तादृशेनैव वचसा मयि प्रसादो विधीयताम्, तदा गुरुभिरुक्तं, "यस्याभिधानं केनापि न ज्ञायते तत्फलं त्वया न भक्षणीयम् १ तथा कर्हिचित्परं प्रहर्तुमिच्छता सप्ताष्टौ पदानि अपसर्तव्यम् २ । तथा राज्ञः पट्टदेवी मातृवद् गणनीया ३ । अथ वायसामिषं कदापि न भक्षणीयम् ४ एते चत्वारोऽप्यभिग्रहास्त्वयैकचित्तेन पालनीयाः, एतत्पालने तवोत्तरोत्तरं महालाभो भावी, ततः सोऽपि गुरुवचसा नम्रो भूतः सन् महाप्रसाद इत्युक्त्वा आत्मोपकारिणस्तान् चतुरोऽपि नियमान् गृहीत्वा स्वस्थानमायातः, गुरवोऽपि विहारं कृत्वाऽन्यत्र गताः, ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथैकदा ग्रीष्मर्तौ स पल्लीपतिर्भिल्लसेनापरिवृतः सन् कश्चिद् ग्रामं हन्तुमचलत्, परं कुतोऽपि तद्वृत्तान्तमवगम्य-
स ग्रामः पूर्वमेव पलाय्य गतः । तदा वंकचूलः सपरिच्छदो व्यर्थीभूतपरिश्रमः क्षुधातृषाभिभूतश्च सन् मध्याह्ने ततो व्या-
घुट्याटव्यां कयापि तरोरधस्तान्निषण्णः, तत्र च क्षुधापीडितैः कियद्भिर्भिल्लैरितस्ततो भ्रमद्भिः क्वापि निकुञ्जे
सुरभिगन्धसद्वर्णपरिपक्वफलैर्नम्रीभूतं किम्पाकतरुं वीक्ष्य सद्यस्तत्फलानि समादाय वंकचूलाग्रे ढौकितानि, तेन च
स्वनियमं स्मृत्वा तन्नाम पृष्टं, तैरुक्तं स्वामिन्नेषां नाम तु केनापि न ज्ञायते, परं स्वादुत्वमधिकं विद्यते, अतो भक्षणी-
यानि, तेनोक्तमज्ञातं फलमहं नाश्नामि, ममायं नियमोऽस्ति ततः पुनस्तैः साग्रहं प्रोचे, स्वामिन् ! सौख्ये नियमाग्रहः
क्रियते, साम्प्रतं प्राणसन्देहे कोऽयं नियमाग्रहः ! तस्मादेतानि भक्षय ! इति तद्वचः श्रुत्वा क्षुत्पीडितोऽपि सन् स
सधैर्यं प्राह. भो इदं वचो न वक्तव्यम्, यदि प्राणा यान्ति, तर्हि अधुनैव यान्तु, परं स्ववाचा गुरुसमक्षं स्वीकृतो नियमः
स्थिरीभवतु, ततस्ते सर्वेऽपि भिल्लास्तानि फलानि स्वैरं भक्षयित्वा तृप्ताः सन्तस्तरुच्छायासु स्वपन्ति स्म परमेकः से-
वको वंकचूलस्यानुरोधेन तानि न भुक्तवान्, अथ स्वयं शयित्वोत्थितः पल्लीशः स्वपार्श्वे सुप्तं भृत्यमुत्थाप्येति प्रोचे,
भो सर्वान् शीघ्रं जागरय, यथा स्वस्थानं गच्छामः । तेनापि शब्देन करस्पर्शेन च सर्वेऽप्युत्थापिताः, परं कथमपि
नोत्तिष्ठन्ति स्म । तदा तान् सर्वानपि गतप्राणान् मत्वा पल्लीशाय तत्स्वरूपं निवेदितम्, सोऽपि श्रुत्वा विस्मितः सन्
स्वनियमं सफलीभूतममंस्त. ततोऽहो गुरुवाण्या माहात्म्यं यत्स्वल्पयाऽपि तयाऽधुनाहं जीवन् रक्षितो मया निर्भाग्ये-

P.P. Ac. Gunratnasuri M.S
Jin Gun Aaradhak Trust

न प्राक्सर्वेष्टसिद्धिविधायकः कल्पतरुरिवाकस्मादुपस्थितः श्री गुरूणां वाक्प्रसरो वृथैव वर्जित इत्यादि चित्ते विभा-
॥ ९ ॥ वयन् स पल्लीशो हर्षविषादाभ्यां सह रात्रौ स्वपल्लीं संप्राप्तः, तत्र च स्वगृहचरितं द्रष्टुं प्रच्छन्नवृत्त्या गृहमध्ये प्र-
विश्य दीपकप्रकाशात्पुरुषवेषया स्वभगिन्या सह सुप्तां स्वभार्यां दृष्ट्वा चिन्तयामास, एषा मे स्त्री दुराचारिणी, अयं
च कोऽपि दुराचारः पुमान् विद्यते एतौ दुष्टौ आशु, मारयामीति विचिन्त्यैकप्रहारेण तौ हन्तुं यावत्खड्गमुत्पाटितवान्
तावदस्य द्वितीयो नियमः स्मृतिमागतः, तदा पदसप्तकमपसरतस्तस्य क्रोधाकुलस्य खड्गोद्वारदेशे स्खलितः खड्गखा-
ट्कारेण च सद्यो जागृता वङ्कचूला, हे भ्रातश्चिरं जीव इत्यजल्पत्, ततो भगिनीं विज्ञायातिलज्जितः, स खड्गं संवृण्वन्
तां पुंवेषरचनाकारणं प्रपच्छ । साऽप्यूचे, हे भ्रातरद्य सायंकाले त्वां द्रष्टुं नटवेषधरास्तत्र शत्रूणां चराः समाजग्मुः, तदा
मया चिन्तितम्, भ्राता तु सपरिच्छन्दः क्वापि गतोऽस्ति यद्येतेऽपीदं ज्ञास्यन्ति, तर्ह्यनाथा पल्ली शत्रुभिः परा-
भविष्यति, तस्मात् कोऽप्युपायः, कार्यः इति विचिन्त्याहं कृतत्वद्वेष धारिणी भूत्वा सभायां प्रविश्य तान् नृत्य
कारयित्वा क्षणाद्यथार्हदानतो विसर्ज्यालस्यात्परित्यक्तपुंवेषैव भ्रातृजायया समं सुप्ता, एतद्वृत्तान्तं श्रुत्वा वङ्कचूलो गु-
रुप्रसादादात्मानं भगिन्यादिहत्यापापादलिप्तं विभावयन् विशेषतो गुरुवाण्याः प्रशंसां चकार ॥ ॥ ९ ॥
अथैकदा स चौर्यार्थमुज्जयिनीं पुरीं ययौ, तत्र चार्धनिशायां कस्यापि धनिनो व्यवहारिणो गृहे प्रविष्टः, परं
कपर्दिव्ययभ्रान्त्या पुत्रेण सह विवदमानं गृहपतिं विलोक्य धिगेतादृशं धनमिति विचिन्तयन् ततो निर्गतः, ततः

स्तोकं स्तोकं जनाद्याचयित्वा सम्प्राप्तसम्पत्तिलवानां द्विजानां धनेनाप्यलमिति विचिन्त्य तद्गृहाण्यपि मुक्तवान् तदनन्तरं या इषद्धनलिप्सया रमणीयं स्वशरीरमनपेक्ष्य कुष्ठिनमपि सेवन्ते तासां वेश्यानां धनेनापि मे न कार्यमिति विचारयन् तद्गृहाण्यपि विमुच्य नृपगृहसमीपमागत्य चिन्तयतिस्म " चौर्यमाचर्यते चेत्तर्ह्युल्लङ्घ्यते खलु भूपतिः । फलिते धनपक्षीण-मन्यथापि चिरं यशः ॥ १ ॥ " इति विचिन्त्य वनाद् गोधामादाय तत्पुच्छलग्नः सन् राज्ञः सौधाग्रमारुह्यान्तःपुरभुवने प्रविष्टः, तत्र चाद्भुतरूपधारिणी राज्ञः पट्टदेवी तदग्रमायाता तया च कथितं, कस्त्वं, किमर्थमत्रायातोऽसीति प्रोक्तः सन् स प्रोचे, अहं तस्करोऽस्मि, बहुतरं मणिरत्नादिद्रव्यं वाञ्छन् इहागतोऽस्मि, तत्स्वरूपलुब्धया राज्या मृदुवाण्या प्रोक्तं. हे सौम्य! द्रव्यस्य कावार्त्ता, एतत्सर्वं तवैवास्ति. अथ किं कम्पसे, सुस्थो भव, तव कुलदेवता तुष्टा. यदहं राज्ञः पट्टदेवी तव वश्या जाताऽस्मि, मयाऽद्य सौभाग्यगर्वेण राजाऽपि रोषितोऽस्ति, तादृश्या मया सह त्वमात्मानं सफलय, मयि तुष्टायां प्राणिनामर्थकामौ सुलभौ स्तः, मयि रुष्टायां तु सद्यो वधबन्धावेव स्याताम् इत्थं कामग्रहग्रस्तया तया लोभितः क्षोभितश्चापि वङ्कचूलः स्वकृतं तृतीयं नियमं स्मरन् तां नत्वा जगाद, हे मातः. त्वं मम पूज्याऽसि, मयि वन्ये तस्करे राजवल्लभायास्तव का स्पृहा, सा प्रोचे, अरे वाचाल बाल ! मयि कामुक्यां मातृसम्बन्धं योजयन् त्वं किं न लज्जसे, अथ चेन्मद्वाक्यं न मन्यसे तर्हि अद्य त्वदुपरि यमो रुष्टः, इत्थं तया विविधवचोयुक्तया भाषितोऽपि स यावन्न चुक्षोभ तावत्क्रोधाकुला सा नखैर्निजदेहं विदार्योच्चैः पूत्कार, अयं च सर्वोऽपि वृत्तान्तो

M.P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

गृहद्वारं सम्प्राप्तेन राज्ञा कपाटविवरे कर्णं संस्थाप्य स्वयं शुश्रुवे, तावत्कलकलारावे जाते सति जाग्रतो द्वारपालकाः शस्त्राणि गृहीत्वा धाविताः, तदा राज्ञा मन्दस्वरेण तेभ्यः प्रोक्तं, भो निरपराधोऽयं तस्करः, साम्प्रतं हेसद् बध्वा यत्नेन रक्षणीयः, प्रातःकाले च सभायां मदग्रे आनीतव्यः, तैरपि तथेति प्रतिपन्नं, ततो राज्ञा सन्तुष्टचेतसा साऽऽसं स्वमहिषीवृत्तान्तं चिन्तयता कथञ्चित् सा रात्रिरतिक्रान्ता, अथ प्रातः समये आरक्षकैः सश्रृङ्खलबन्धनैर्बध्वा नृपाग्रे आनीतः, नृपेण च साक्षेपं पृष्टः सन् सस्पष्टतया सर्वमपि यथावस्थितं वृत्तान्तं राज्ञ्या मधुरवाण्याऽहं जल्पित इत्येतत्पर्यन्तमुक्त्वा मौनमभजत, ततो विज्ञातपरमार्थो राजा तुष्टमानसः सन् एनं सत्कृत्य भूरि मुदा चालिङ्ग्य प्रोवाच । हे सत्पुरुष ? तव साहसेनाहं तुष्टोऽस्मि । तत एषाऽग्रमहिषी मया तुभ्यं प्रासादिता, त्वमेनां गृहाण । स प्रोचे, राजन् ? या ते पट्टराज्ञी सा मे ध्रुवं माता, तस्मादेतद्वचः पुनर्न वाच्यम, ततो राज्ञा शूलारोपणाद्युपदेशेन बहुधा क्षोभितोऽप्यसौ यदा नियमान्न चलितः, तदाऽस्य धीरत्वेनातिसन्तुष्टो राजा एनं पुत्रपदे स्थापितवान्, तां स्त्रियं च हन्तुमिच्छन्नपि अस्य वचसा जीवन्तीममुञ्चत्, ततो वङ्कचूलः स्वस्य भगिनीं पत्नीं च तत्रानाय्य ताभ्यां सहितः सुखेनास्थात्, तथा धर्मे सञ्जातप्रत्ययः सन् विशेषतस्तत्रैव चित्तवृत्तिं बबन्ध, तान् नियमदातृन् गुरूंश्च नित्यं सस्मार । एकदाऽस्य भाग्योदयात्त एवाचार्यास्तत्र समेताः, अयं च महताऽऽडम्बरेण गुरुवन्दनार्थं गतः, तत्र शुद्धं धर्मस्वरूपं श्रुत्वा तत्त्वरुचिरूपं सम्यक्त्वं स प्रपन्नवान् । तदा चोज्जन । यिनीपश्चिमदिग्विभागस्थितशालिग्रामनिवासी जिनदासाख्यः श्रावकस्तस्य परममित्रमभूत् । एकदा

॥ १० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राज्ञा कामरूपदेशाधीशं सुदुर्जयं मत्वा तज्जयार्थं वङ्कचूलः समादिष्टः, तदा सोऽपि नृपादेशात् तत्र गत्वा युद्धं कृत्वा कामरूपेशं विजित्य स्वयं च वैरिकृतशस्त्रप्रहारैर्जर्जरः सन् उज्जयिनीं पुरीं समाजगाम । तत्र च राज्ञैतत्पीडया पीडितेन बहून् वैद्यानाकार्य तैरस्य चिकित्सा कारिता । परं कथमपि प्रहारा न संहिताः, तदा राज्ञा सरोषं पृष्टैर्वैद्यैर्नृपाग्रे काकमांसमौषधं प्रोक्तं, तत् श्रुत्वा राजा वङ्कचूलं गाढमालिङ्ग्य साश्रुलोचनः सन् इत्थं प्रोवाच–हे वत्स ! त्वदापदं छेत्तुं ये ये प्रतीकाराः कृतास्ते सर्वेऽपि ममाभाग्याद् वृथा जाताः । अथैकं वायसामिषं भेषजं विद्यते तद् गृहाण, येन ते शरीरे सौस्थ्यं स्यात्, स प्रोचे हे नाथ अहं सर्वथा मांसभक्षणान्निवृत्तोऽस्मि, ततो मे वायसामिषान्न कार्यं, राज्ञोक्तं, वत्स जीवतो जन्तोर्नियमा बहुशो भवेयुः, परं मृतौ सति सर्वे यान्ति तस्मादिदं भक्षय तदा स नृपोक्तं वचो निशम्य प्रोचे, हे नाथ ! मम जीविते स्वल्पाऽपि तृष्णा नास्ति, एकदाऽवश्यं मृत्युर्भावी तस्माज्जीवितं यातु, चेत् अधुनैव यातु परमेतदकृत्यमहं न कुर्वे, ततो राजा वङ्कचूलस्य मित्रं शालिग्रामवर्तिनं जिनदासश्रावकमाह्वातुं निजं नरं प्रैषीत्, सोऽपि मित्रस्नेहात् सद्यस्ततश्चलितो मार्गे च रोदनोद्यतं दिव्यं स्त्रीद्वयं विलोक्य के युवां किं वा रुदिथ इति पप्रच्छ, ताभ्यामुक्तमावां सौधर्मकल्पवासिन्यौ देव्यौ भर्त्तुश्च्यवनाद् विरहविह्वले सत्यौ वंकचूलाख्यं क्षत्रियं भर्त्तारं प्रार्थयावहे सोऽद्य त्वद्वचसा चेन्नियमं भंक्ष्यति, तर्हि आशु दुर्गतिं गन्ता तेन सम्प्रति रुदिवः । ततो जिनदासेनोक्तं– मा रोदिष्टं, यद् भवत्योरिष्टं तदेव करिष्यामि इत्युक्त्वा ते आश्वास्य स श्राद्ध उज्जयिनीं समाजगाम । तत्र च तेन नृपादे-

शान्मित्रमन्दिरमागत्य कुशलप्रश्नपूर्वकमौषधादिप्रवृत्तिं कुर्वता तस्य नियमेऽतिस्थिरत्वं विज्ञाय शरीरं च जर्जरीभूतं विलोक्य राजादि सर्वलोकसमक्षं प्रोक्तं, अस्य धर्म एवौषधं युक्तं, अतोऽपरा काऽप्यौषधादिप्रवृत्तिर्न कार्या, वंकचूलेनापि प्रोक्तं, हे मित्र ! यदि त्वं मयि स्नेहं दधासि तर्हि आलस्यं विहाय मे प्रान्तकालस्य सम्बलं देहि, ततस्तेनापि सम्यग् रीत्याराधना कारिता, तदा वंकचूलश्चतुर्विधाहारप्रत्याख्यानं कृत्वा चतुःशरणानि स्वीकृत्य पञ्चपरमेष्ठिनमस्कारं स्मरन् सर्वजीवेषु निर्वैरतां दधत् प्राक्कृतं दुःकृतं निन्दन् सुकृतं चानुमोदयन् समाधिना कालं कृत्वा द्वादशमे देवलोके देवत्वं सम्प्राप्तः । ततो जिनदासस्तस्यौर्ध्वदेहिकं कृत्वा गृहे व्रजन् मार्गे ते द्वेऽपि देव्यौ पूर्ववद्रुदत्यौ वीक्ष्य पृष्टवान् हे भद्रे ! अद्यापि युवाभ्यां किमर्थमत्रैवं विलप्यते. सोऽखण्डितव्रतः सन् इतो मृत्वा भवत्योर्वल्लभः किं न जातः, तदा ते देव्यौ निःश्वस्योचतुः, हे स्वच्छाशय ! किं पृच्छसि, स ते सुहृत्प्रान्ते परिणामविशुद्ध्याऽस्मान् व्यतीत्य द्वादशं स्वर्गं जगाम, एतत् श्रुत्वा परमानन्दं सम्प्राप्तो जिनदासः सुहृदं ध्यायन् श्रीजिनधर्मं चानुमोदयन् स्वगृहं ययौ ॥



॥ इति नियमपालने वङ्कचूलवृत्तान्तः सम्पूर्णः ॥

श्रीकैलाससागरसूरि ज्ञानमंदिर
श्रीमहावीर जैन आराधना केन्द्र
कोबा (गांधीनगर) पि ३८२००९

॥ ॐ नमः ॥

# ॥ अथ श्री शीलकुलके नर्मदासुन्दरी कथा ॥

P.11102

नंदउ नमयसुंदरी सा सुचिरं जीए पालिअं सीलं ॥
गीहत्थयणं पि काउं सिहिया य विडंवणा विविहा ॥ १ ॥

व्याख्या—सा नर्मदासुंदरी चिरकालं यावन्नन्दतु यया कृत्रिमं ग्रैथिल्यं कृत्वा त्रिविधा नानाप्रकारा विडम्बनाः कदर्थनाः सहिताः निर्मलं शीलं च पालितं, ॥ ८ ॥ तस्याः कथा चेत्थम्— वर्द्धमानाभिधनगरे सम्प्रतिनामा राजा, ऋषभसेनाभिधश्च सार्थवाहः परिवसति तस्य । भार्या वीरमती, तस्याः सहदेव- वीरदासाख्यौ द्वौ पुत्रौ, ऋषिदत्ताभिधाना च पुत्री, क्रमेण सा पुत्री जनस्पृहणीययौवनावस्थां प्राप्ता, बहुभिर्व्यापारिधनिकपुत्रैर्मार्गिताऽपि मिथ्यात्वतिमिरान्धभूतेभ्यस्तेभ्यः सा तत्पितृभ्यां न ददे,

अन्यदा चन्द्रपुरनगराद् रुद्रदत्ताभिधः कश्चित् श्रेष्ठी तन्नगरे समाययौ. अन्यदा तेन रुद्रदत्तेन सत्यमपि प-

P.P. Ac. Gunratnasuri M.S
Jun Gun Aaradhak Trust

॥ १२ ॥ माणविदां दययेव व्योमाम्बुजोदाहरणं निजवदनाम्भोजेन सत्यीकुर्वन्ती निजप्रासादगवाक्षस्था सा ऋषिदत्ता दृष्टा, तां
दृष्ट्वा मन्मथशरविद्धो रुद्रदत्तो गतचैतन्य इव बभूव। ततस्तेन स्वकीयमित्राय कुबेरदत्ताय स्वकीयाभिप्रायं निवेद्य पृष्टं
भो मित्र ! रूपनिर्जितनिर्जराङ्गनेयं कस्य पुत्री तेनोक्तं मित्र इयं जिनधर्मैकतत्परस्य ऋषभसेनसार्थवाहस्याङ्गजाऽ-
स्ति, किञ्च जैनं विना सोऽन्यस्मै कस्मैचिदपि निजाङ्गजां नैव दास्यति, तत् श्रुत्वा स कपटश्रावकीभूय नित्यं जिन-
पूजा-साधुवन्दना-ऽऽवश्यकादिक्रियापरः समजनि। अथ ऋषभसेनस्तं जिनधर्मपरायणं निजसाधर्मिणं ज्ञात्वा तस्मै
निजतनयां ददौ, अथायं रुद्रदत्तः श्वसुरमापृच्छ्य ऋषिदत्तामादाय चन्द्रपुरनगरे समायातः, त्यक्तश्च तेन तत्र जिन-
धर्मः, क्रमेण ऋषिदत्ताऽपि भर्तृस्नेहवः संसर्गदोषेण जिनधर्मे शिथिला जाता. क्रमेणैषा गर्भिणी जाता, सम्पूर्ण-
समये तस्या महेश्वरनामा पुत्रो जातः; क्रमेण सकलविद्याभ्यासं कृत्वा स यौवनवयः सम्प्राप्तः, इतश्च ऋषिदत्ताया वृ-
द्धभ्राता सहदेवाभिध आसीत्। तस्य सुन्दर्याख्या भार्या बभूव, तस्या एकदा नर्मदायां स्नानकरणार्थं दोहदः समुत्प-
न्नः, ततः सहदेवसार्थवाहः क्रयाणकानि समादाय सुन्दरीसहितो नर्मदोपकण्ठे समागत्य तस्या दोहदं पूरयामास। ॥ १२ ॥
तत्र च व्यापारे बहुलाभं विज्ञाय तेन नर्मदापुरीत्यभिधानं नगरं संस्थाप्यैकं जैनमन्दिरमपि निर्मापितं क्रमेण सम्पूर्ण-
समये तयैका पुत्री जनिता, श्रेष्ठिना पुत्रवत्तस्या जन्ममहोत्सवं कृत्वा नर्मदासुन्दरीति नाम दत्तं, अथ क्रमेण शशिले-
खेव वर्द्धमाना सकलकलाकलापबन्धुरा सा यौवनं प्राप्ता ॥

अथैकदा ऋषिदत्तया तस्या अवर्णनीयरूपलवणिमादिगुणान् श्रुत्वा चिन्तितं, चेदेषा मम पुत्रस्य महेश्वरस्य पाणिग्रहणं कुर्यात् तदा मे मनोऽभिलाषः सफलीभवेत्, परं मां जिनधर्मपराङ्मुखीं विज्ञाय मम भ्राता तां निजतनयां मम पुत्राय नैव दास्यतीति चिन्तयन्ती सा विलापं कर्तुं लग्ना, तावद्रुद्रदत्तेन तत्कारणं पृष्टा सा निजहृदयगताभिलाषं कथयामास । तत् श्रुत्वा सोऽपि चिन्ताक्रान्तचित्तः समभवत् । अथ पार्श्वस्थेन महेश्वरेण तद्वृत्तान्तं कर्णगोचरीकृत्योक्तं, हे पितरौ युवां विषादं मा कुरुतं, अहमेव तत्र गत्वा केनाप्युपायेन तां परिणीय समागमिष्यामीत्युक्त्वा सशीघ्रमेव तत्रागत्य मातुलाय मिलितः, ततः क्रमेण तेन विनयादिगुणगणैर्मातुलादीनां मनस्तथा वर्जितं यथा ते सर्वेऽपि तस्योपरि हर्षोल्लसितहृदयाः सञ्जाताः, महेश्वरोऽपि नित्यं निजशुद्धभावेन देवगुरुवन्दनावश्यकादिक्रियाभिर्जिनधर्माराधकः समभूत्, अथ तं तथाविधं जिनधर्मपरायणं विज्ञाय मातुलेन तस्मै नर्मदासुन्दरी परिणायिता । कियत्कालं तत्र स्थित्वा स श्वशुराज्ञया तामादाय निजनगरे समायातः वधूसहितं निजतनयं समागतं दृष्ट्वा पितरावत्यन्तं प्रमुदं प्राप्तौ क्रमेण नर्मदासुन्दर्या श्वशुरादीन् प्रतिबोध्य मिथ्यात्वघोरसागरे निमज्जतः समुद्धृत्य सर्वेऽपि ते जिनधर्मैकयानपात्रे समारोपिताः । अथैकदा सा नर्मदासुन्दरी गवाक्षस्था निजवदनतो दिवाऽपि नगरजनानां चन्द्रोदयभ्रमं कारयन्ती ताम्बूलं चर्वन्ती निष्ठीवनं चकार । अकस्माच्च तन्निष्ठीवनं पथि गच्छतो जैनमुनेरेकस्य मस्तकोपरि पतितं, मुनिनोक्तं यथेवं त्वं मुनीनामाशातनां करोषि, तेन तव भर्तुर्वियोगो भविष्यतीति श्रुत्वा भयसहितं विषादं दधाना सा तूर्णमेव गवाक्षादुत्तीर्य

मुनेश्वरणयोर्नमस्कृत्यानुपयोगतो विहितं निजापराधं क्षमयामास । मुनिनोक्तं– भो महानुभावे मम हृदये मनागपि क्रोधो
नास्ति मन्मुखादेतद्वाक्यं वृथैव निर्गतं तेन त्वं खेदं मा कुरु, अथ नर्मदासुन्दरी स्वकर्मणामेव दोषं ददती गृहे समागता ।
॥१३॥ अथैकदा महेश्वरदत्तो व्यापारार्थं द्वीपान्तरं प्रति प्रस्थितः, तदा मोहाकुलमानसया स्त्रिया भणितम्, हे स्वामिन्नहमपि भव-
ता सार्धमेव समागमिष्यामि. यतो भवद्वियोगं सोढुमहमशक्तैव, तस्या अत्याग्रहं विज्ञाय सोऽपि तया सह प्रवहणारूढो
द्वीपान्तर प्रति चलितोऽवगाहितश्च तेन भूयान् पन्थाः । अथैकदा रात्रौ प्रवहणमध्ये केनचित्पुरुषेण गायनं कर्तुं प्रारब्धं त-
त्तु श्रुत्वा नर्मदया भर्तुरग्रे कथितं, हे स्वामिन् योऽयं पुरुषो गायति, तस्य शब्दानुसारेणाहं जानामि, यदयं पुरुषो श्या-
मवर्णः स्थूलहस्तपादौ दुर्बलदेहो मषांकितगुह्यस्थानो द्वाविंशतिवर्षप्रमाणो विशालहृदयश्चास्ति, तत् श्रुत्वा भर्त्रा चिन्तितं,
नूनमियमसती वर्त्तते, नोचेदियमेतादृशी वार्त्ता कथं जानीयात्, अथ प्रभाते तेन स पुरुषो दृष्टः पृष्टश्च तदा तत्सर्वमपि
यथोक्तं मिलितं । अथ श्रेष्ठिना निजहृदयोद्भूतक्रोधानलमवसरे क्षणभस्मनाच्छाद्यस्थितं इतः कतिचिद्दिवसानन्तरं राक्ष- ॥१२॥
सद्वीपमासाद्य नाविकैः कथितं, भो लोका ! अहमत्र प्रवहणं स्थिरीकरोमि, अयं राक्षसद्वीपः समायातः, यः कोऽपि
जलेन्धनादिग्रहणेच्छुर्भवेत् तेन तत् शीघ्रमेव ग्राह्यमित्युक्त्वा तेन प्रवहणं स्थिरीकृतं सर्वेऽपि लोकास्तत्र शनैः शनैरुत्तीर्य ज-
लेन्धनादिसञ्चयं चक्रुः । अथ महेश्वरेणापि तया सहोत्तीर्य चिन्तितम्, किमहमेतां दुःशीलां जलधौ निधानीकरोमि वा
विषं दत्वा यमकिङ्करित्वं प्रापयामीति विचारयन् स तया सह क्रीडामिषेण कदलीकानने समागतः । सुप्तश्च क्षणं क-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

दलीदलकोमलशय्यायां, अथ तत्र नर्मदासुन्दरी आन्दोलितकदलीदलालिभिः सुरभिवनवातैस्तूर्णं निद्रां प्राप्ता, एवं सु-
खसुप्तां तां तत्रैव विमुच्य महेश्वरदत्तस्तूर्णं ततः समुत्थाय रत्नाकरतटमागत्य प्रवहणोपरि समारूढः कथितं च तेन कप-
टकुटिलचेतसा नाविकादिलोकानां पुरो यन्मम महिला राक्षसैर्भक्षिता । अहं च कथमपि प्रपलाय्यागतोऽस्मि । निशा-
चरप्रकराश्च पृष्ठे समागच्छन्ति, तत इतस्तूर्णं प्रवहणं सज्जीकृत्य वाहयत इति श्रुत्वा भयाकुलचेतसो नाविका द्रुतं ततः
पोतं वाहयामासुः । अथ पोतस्थितेन महेश्वरेण चिन्तितं सम्यग्जातं यद्व्यपगतलोकापवादं मयैषा दुःशीला त्यक्ता । अथ
पवनप्रेरितः पोतोऽयं यवनद्वीपे प्राप्तः ।

कियत्कालानन्तरं स श्रेष्ठी ततो बहुधनमुपार्ज्य निजगृहे समायातः । कथितं च तेन निजपरिवाराय राक्षसभ-
क्षणादिनिजभार्यास्वरूपं श्रुत्वा प्राप्तेन परिवारेण च तस्याः प्रेतकार्यादिकृतं महेश्वरश्चान्यां भार्यां परिणीतवान् ।

अथ तत्र सुप्तोत्थिता नर्मदासुन्दरी तत्र निजभर्तारमदृष्ट्वा हृदयास्फोटं पूत्कारं कुर्वन्ती विविधविलापैर्वनवासि
जन्तूनपि रोदयन्ती हा नाथ! मामिहैकाकिनीं मुक्त्वा त्वं कथमव्रज इति पुनः पुनः प्रजल्पन्ती नयनाश्रुजलैर्वनवृक्षसञ्चया-
न् सिञ्चयन्ती वदनतो दीर्घोष्णनिःश्वासान्निष्कासयन्तीतस्ततोऽटन्ती तटिनीपतेस्तटमागता परं, तत्रापि प्रवहणमनालो-
क्य हृदयोद्भूतातीव दुःखतो मूर्च्छां प्राप्ता, सुरभिशीतलानिलतः पुनः सचेतनीभूय नानाविलापमुखरीकृतकाननैषा चि-
न्तयामासाथानन्यशरणाया ममात्मघात एव शरणं पुनस्तया चिन्तितं संसारसागरतरणैकयानपात्रनिर्भजनागमे प्रतिषिद्ध-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बालमरणकरणतो न ममात्मनः कापि श्रेयोऽर्थप्राप्तिः किञ्च न जानेऽहमत्र भर्त्रा कथमेकाकिनी त्यक्ता, नूनं मया तदा या जैनमुनेरसंभावना कृता तस्यैव दुष्कर्म उदयमागतमेव इति विचार्य सा मृत्तिकाया एकां श्री जिनप्रतिमां कृत्वा सर्वदा तत्र पूजयति वनफलादि च भक्षयति, इत्थं सा नमस्कारध्यानपरायणा स्वकर्मनिन्दनतत्परा धर्मप्रभावतो वनवासिक्रूरप्राणिभिरनुपद्रुता निजसमयं गमयांचकार । अथैकदा तस्याः पितृव्यो वीरदासाभिधानो बब्बरकुलं प्रति गच्छन् जलेन्धनाद्यर्थं प्रवहणस्थस्तत्र समागतः तेन रत्नाकरोपकण्ठे भ्रमन्ती नर्मदासुन्दरी दृष्टोपलक्षिता च । विस्मयमापन्नेन तेन पृष्टं हे पुत्रि ! त्वमत्रैकाकिनी कथं समागतासि, इत्युक्ता सा नयनाभ्यामश्रूणि मुञ्चन्ती सकलमपि निजवृत्तान्तमादितः कथयामास । अथ वीरदासस्तामाश्वास्य निजप्रवहणमध्ये समारोप्याग्रे चलितः । क्रमेण बब्बरकुले समागत्य राज्ञश्च प्राभृतं दत्त्वा संमुखेन तत्र व्यापारे समुद्यतोऽभवत् । नर्मदासुन्दर्यपि तत्र सुखेन तिष्ठति, अथ तस्यां नगर्यामेका हरिण्यभिधाना रूपजितनिर्जराङ्गनावाराङ्गना वसति । तस्यै सन्तुष्टेन राज्ञैवं वरो दत्तोऽस्ति, यतः कोऽपि नूतनव्यापारी अत्र समागच्छेत् स तस्यै वाराङ्गनायै दीनारसहस्रमर्पयेत् । अथ वीरदासं तत्रायातं श्रुत्वा तस्या वाराङ्गनाया दासी तद्दीनारसहस्रं गृहीतुं तत्पार्श्वे समायाता । तत्र रूपलावण्यादिभिर्निखिलनगरनारीगर्वतिरस्कारिणीं नर्मदासुन्दरीं विलोक्य विस्मयमापन्ना गृहे समागत्य सा हरिणीं प्रति कथयामास हे स्वामिनि मयाऽद्य वीरदासगृहे निखिलनागरपुरुषवशीकरणैकलावण्यमयैका प्रमदा विलोकिता । सा चेदस्मद्गृहे भवेत् तदा नूनं कल्पवल्ल्येव गृहांगणे प्रफुल्लिता ज्ञातव्या

॥१४॥

इतो वीरदासो हरिण्यै दीनारसहस्रं समर्पयितुं तद्गृहे समागतः। हरिण्या च दीनारसहस्रं गृहीत्वा मिष्टवचनसत्कारादिभिस्तस्य मनो वशीकृत्य तत्पार्श्वात्तन्नामांकिता मुद्रिकाऽधिगता। अथ वीरदासस्ततो निःसृत्य व्यापारार्थमन्येषां व्यापारिणां गृहे गतः, तदवसरं प्राप्य कपटपेटया हरिण्या दास्यै कथितं, त्वमेतन्मुद्रिकाभिज्ञानं दर्शयित्वा गतिप्रवृत्त्याकारणच्छद्मना तां युवतीं द्रुतमत्रानय। अथ सैषा कपटपाशोपेता चेट्यपि तथैव कृत्वा नर्मदासुन्दरीं तत्रानयामास। वेश्यया च सा भूमिगृहे गुप्तीकृता। अथ निजस्थानं समागतेन वीरदासेन नर्मदामनालोक्य व्याकुलीभूय नगरमध्ये सा गवेषिता। परं तां निर्भाग्यो लक्ष्मीमिव कुत्राप्यलब्ध्वा स हरिणीगृहे समागतः, तेन तस्यै बहुधा पृष्टं परमनृतैकवन्या तया सत्यं न जल्पितं, भूरि दिवसानन्तरं नर्मदा गवेषणश्रान्तः शोकाकुलमानसः सततो निःसृत्य भृगुकच्छपुरे समायातः, अथ तत्रैको जिनदासाभिधानः परोपकारैकदक्षः श्राद्धवर्यो वसति, तत्पुरतो दुःखितेन वीरदासेन निजसकलोऽपि वृत्तान्तः कथितः, तदा तेनोक्तं— हे बन्धो त्वं खेदं मा कुरु, अहं बुद्धिप्रयोगेण निश्चितं नर्मदां समानयिष्यामीत्युक्त्वा दयार्द्रान्तःकरणेन तेन क्रयाणकैः प्रवहणानि पूरितानि. प्रस्थितश्च स बब्बरकूलं प्रति इतो वीरदासगमनानन्तरं वारांगनया सा नर्मदा भूमिगृहाद् बहिर्निष्कासिता। कथितं च तस्यै त्वमथ वारांगनाचारमङ्गीकुरु, भुंक्ष्व च। वियोगरहितानि विषयसुखानि नर्मदया तु तत्कथमपि नाङ्गीकृतम्, वेश्यया पञ्चशतकशाप्रहारैस्ताडितापि सा स्वकीयशीलभंगं कर्त्तुं मनसाऽपि नेच्छेत्, इति दैवयोगेन नर्मदाशीलमाहात्म्यतस्तद्दिने एव हरिणी मृता।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तदा भीताभिरन्याभिस्तत्परिवारवेश्याभिः सा नर्मदा गृहान्निष्कासिता । इतश्च राज्ञा तद्रूपादि श्रुत्वा तदानयनार्थं निजप्रधानपुरुषप्रेषणपूर्वकं सुखासनिका मुक्ता । अथ नर्मदा स्वशीलरक्षणार्थं बुद्धिमुपाज्यं कृत्रिमग्रथिलत्वमङ्गीकृत्य सुखासनिकामवगणय्य तैः सार्द्धं चलिता । मार्गे च ग्रथिले वानेकविधानि कुतूहलानि कुर्वन्ती पंकिलमेकं पल्वलं दृष्ट्वा तत्र पतित्वा शरीरे च कर्दमलेपं कृत्वा लोकानां पुरः कथयति, भो लोका ! यूयं पश्यताहं मम शरीरे कस्तूरिकालेपं करोमि, किं च यः कोऽपि जनः समीपे समायाति, तं प्रति सा कर्दममुच्छालयति हस्ताभ्यां च धूलिमुत्पाट्य स्वशिरसि निःक्षिपति लोकांश्चैवं धूलिधूसरान् विदधाति, ततः प्रधानपुरुषै राज्ञोऽग्रे तस्या ग्रथिलत्वं ज्ञापितं, राज्ञा मान्त्रिकानाहूय नानाप्रकारमन्त्रतन्त्रादिप्रयोगः कारितः, तेन त्वेषा सविशेषं स्वकीयग्रथिलतां प्रकटीकृत्य धूलिपाषाणादीनक्षिपत् । अथ तां ग्रथिलां ज्ञात्वा राज्ञाऽपि सा त्यक्ता, अथ सा नागरडिम्भादिभिरुपद्रुता निजग्रथिलतां प्रकटयन्ती नगरमध्ये परिभ्रमति, इतोऽसौ जिनदासश्रेष्ठी प्रवहणयुतो बब्बरकुले समागत एव डिम्भगणैः परिवेष्टितां जिनस्तवनान्युच्चैरयन्ती इतस्ततः परिभ्रमन्तीं ग्रथिलां नर्मदां विलोकयामास, श्रेष्ठिना चिन्तितम्, नूनमेषा ग्रथिला नास्ति, श्रेष्ठिना तस्यै प्रोक्तं,— हे पुत्रि ! त्वं मा भयं कुरु, इति श्रुत्वा नर्मदया शिशवो भापयित्वा दूरं निष्कासिताः, तदा श्रेष्ठिना पृष्टं, हे पुत्रि ! केयं तेऽवस्था, तव पितृव्यवीरदासकथनतोऽहं भृगुकच्छनगरवास्तव्यो जिनदासनामा श्रेष्ठी ते शुद्धपथमेवान्वायातोऽस्मि, तद् श्रुत्वा हृष्टा, नर्मदा निजोदन्तकथनपूर्वकं बभाण, हे तात ? मामस्मात् संकटान्निष्कासय, जिनदासेनोक्तम्, अ-

य त्वया राजमार्गे नगरनारीपानीयघटाः कर्करादिप्रयोगेण भञ्जनीयाः, अथ तत्संकेतपुरस्सरं तौ द्वावपि नगरमध्ये समा-
गतौ तत्र नर्मदा हास्यादित्रिविधकुतूहलानि कुर्वन्ती नगरनारीशिरःस्थान् कूपोध्धृतजलभृतघटान् कर्करादिभिर्बभञ्ज,
गतश्च राज्ञोऽग्रे नागरजनकृतस्वत्पूत्कारः, राज्ञोक्तमस्ति कोऽपीदृशो नरो य एतां पुरमध्याद्‌बहिर्निष्कासयेत्, वेश्यामरणतो-
भीतानां नागराणां मध्ये केनापि तत्कार्यं नाङ्गीकृतम्, तदा जिनदासेनागत्योक्तम्— स्वामिंश्चेत्तवाज्ञा तर्हि द्वीपान्तरगम-
नोत्सुकोऽहमेनां प्रवहणे समारोप्य द्वीपान्तरे नयामि, राज्ञा तु हर्षेण नगरजनप्रियं तत्कार्यं तस्मै समर्पितम्,

अथ जिनदासेन नृपाज्ञया लोकानां दर्शनाय बलात्कारेण तस्याश्चरणौ निगडितौ बध्धा च तस्या हस्तौ सा
प्रवहणमध्ये मुक्ता. वाहितानि च प्रवहणानि, पथि तया सर्वग्रथिलतां त्यक्त्वा स्नानं कृत्वा जिनदासदत्तवस्त्राभूषणानि
परिहितानि, क्रमेण प्रवहणानि भृगुकच्छे प्राप्ता निमीलिता च नर्मदा निजपितृव्याय. पितृव्योऽपि हृष्टः सन् जिनदा-
सस्य महोपकारं मन्यमानस्तया सह नर्मदापुर्यां समागतः तां दृष्ट्वा सर्वमपि कुटुम्बं प्रमुदितम्, तयाऽपि सर्वं निजवृत्त-
न्तं कुटुम्बाग्रे प्रकटीकृतम्,

अथैकदा ज्ञानी मुनिरेकस्तत्र समायातः, तं प्रति वन्दनार्थं सर्वे गताः, देशनान्ते नर्मदा पित्रा पृष्टम्, हे भगवन् केन
कर्मणा नर्मदा दुःखिनी जाता, मुनिनोक्तं— सा पूर्वभवे नर्मदा नद्यधिष्ठायिका देव्यासीत्. एकदा शीतादिपरिषहसहना
र्थं साधुरेकस्तत्र समायातः, तं दृष्ट्वा मिथ्यात्वभावेन तया तस्योपसर्गाः कृताः, परं साधुं निश्चलं ज्ञात्वा तं क्षामयित्वा

सम्यक्त्वमङ्गीकृतम् । ततश्च्युत्वेयं तव तनया नर्मदासुन्दरी जाता, भवान्तराभ्यासवशात्तद्गर्भोत्पत्तिसमये तस्या मातुर्नर्मदा नदीस्नानदोहदो जातः, साधूपसर्गकरणतस्तया च दुःखं प्राप्तम्; इति श्रुत्वा नर्मदया जातिस्मरणं प्राप्य दीक्षा गृहीता, एकादशाङ्गानि अधीत्य विविधतापसा शरीरशोषं विधायैकदा सा परिवारयुता चन्द्रपुरीं समागता, महेश्वरदत्तोपाश्रये च स्थिता श्वश्रूश्वशुरभर्त्रादीनुपलक्ष्य धर्मं श्रावयति, परं ते तां नोपलक्षयन्ति, अथैकदा तया महासत्या स्वरलक्षणादीनि व्याख्यातानि, यत्स्वरश्रवणेनैवेत्थं पुरुषादीनां वर्णाकारतिलमषवर्षादीनि ज्ञायन्ते, तत् श्रुत्वा महेश्वरेण चिन्तितम्, यद्येवंविधं वर्णनं शास्त्रमध्ये वर्तते, तदा नूनं मया सा निरपराधा प्रिया परित्यक्ता, इति चिन्ताकुलहृदयेन तेन पृष्टं. हे महासति ! उक्तज्ञानयुक्ता मयैका निर्दोषा मम स्त्री परित्यक्ता. साऽथ कीदृशी भविष्यति. साऽप्योक्तं. त्वं खेदं मा कुरु, सैवेषाहं नर्मदासुन्दर्यस्मीत्युक्त्वा प्रतीत्यर्थं तया सर्वोऽपि संकेतितवृत्तान्तः कथितः, अथ तामुपलक्ष्य महेश्वरेण क्षमा याचिता, साऽप्योक्तं—नैष तव दोषः, मम कर्मणामेवायं दोषः; ततो महेश्वरऋषिदत्तेवैराग्यतो दीक्षां जगृहतुः, क्रमेण ते त्रयोऽप्यनशनं कृत्वा देवलोके गताः; भवैकेन च मोक्षं गमिष्यन्ति,

॥ इति श्री शीलकुलके नर्मदासुन्दरी कथा संपूर्णा ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust